## चतुर्थः अनुच्छेदः

समाजे केचन जनाः नारीशिक्षायाः विरोधिनः भवन्ति । तेषां मतानुसारेण नारीशिक्षया समाजे धर्मस्य संस्कृतेः च विनाशः भवति । शिक्षां गृहीत्वा नार्यः निरङ्कुशाः जायन्ते । अनेन समाजस्य नैतिकमूल्यानि अधोगतिं प्राप्नुवन्ति । समाजस्य विकाशाय नारीशिक्षा नितान्तमावश्यकी । पुरुषः शिक्षितः भवति चेत् कश्चित् एकः शिक्षितो भवति । किन्तु नारीशिक्षाद्वारा परिवारः शिक्षितो भवति । पुरुषः स्त्री च गृहशकटस्य द्वे चक्रे स्तः । द्वयोः चक्रयोः दृढतायामेव गृहशकटस्य चालनं सुचारुरूपेण भवितुं शक्नोति । एतयोः चक्रयोः दृढता मुख्यरूपेण शिक्षामाश्रिता । शिक्षिताः नार्यः गृहस्य संचालनम् अधिकदक्षतया कुर्वन्ति । धनस्य सदुपयोगं ताः सुष्ठु कर्तुं जानन्ति । अधुना नारीशक्तीकरणयोजना सर्वकारपक्षतः प्रचलति । शास्त्रेषु अपि लिखितमस्ति-

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।।"

## प्रश्नाः

1. **एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

   (क) नारीशिक्षाविरोधिनां मतं किम् ?

   (ख) गृहशकटस्य के द्वे चक्रे ?

   (ग) शास्त्रेषु किं लिखितमस्ति ?

2. **एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

   (क) कस्य विकाशाय नारीशिक्षा आवश्यकी ?

   (ख) परिवारः केन शिक्षितो भवति ?

   (ग) काः धनस्य सदुपयोगं कुर्वन्ति ?

   (घ) सर्वकारपक्षतः का योजना प्रचलति ?

●●●